—The epithet सुप्तोत्थितां taken with the description of her waist and breasts suggests that she had gone to sleep completely naked just after the sexual act at night, and as she awakes in the morning the poet describes her naked beauty in which the slender waist, and her topping breasts are prominent. A friend objects to this suggested interpretation, saying that the epithet नानाविचित्र° includes her garments; but looking to the tone of the poem, which is highly erotic, depicting संभोगशृङ्गार, we would go even a step further, and suggest that these मंडनs which ornamented her body, were not of ordinary pearls or jewels, but were the marks of नखक्षत etc. Comp. The सुप्तोत्थिता in śloka 1, and the marks on the thigh etc. indicated in śloka 15. —Com. reads प्रणयिनी for निजवपुः in the first pāda.

अद्यापि तां कनककान्तिमदालसांगी व्रीडोत्सुकां निपतितामिव चेष्टमानाम्।
अगांगसंगपरिचुंबनजातमोहां तां जीवनौषधिमिव प्रमदां स्मरामि ॥ ४७ ॥

I still remember that lustful girl of golden brightness, her limbs sluggish owing to youthful intoxication, she being uneasy and bashful at heart and acting as if falling down (in sheer passion) and then by close contact of bodies, as also by kissing all round, having lost her balance of mind,—she, who was like the panacea of my life.

—The com. reading मदनभीतिविकम्पमानाम् for निपतितामिव चेष्टमानाम् showing her fearful trembling at the time of sexual act, is, we think, better suggested by the epithet व्रीडोत्सुकां, and needs no further explanation. Her falling down may also be due to her व्रीडा and उत्सुकता, instead of passion, as suggested above. The main idea with these readings is that she was first afraid of the sexual act, but subsequently by kissing and close embraces, she was made to forget her fear and uneasiness; जातमोहा may also be taken to mean that she forgot her first tremor to such an extent that she herself took the initiative and thus rightly became जीवनौषधि to the poet. Her boldness thus attained is illustrated well in the following śloka :

अद्यापि तत्सुरतकेलिनिरस्त्रयुद्धं बन्धोपबन्धपतनोत्थितशून्यहस्तम्।
दन्तौष्ठपीडननखक्षतरक्तसिक्तं तस्याः स्मरामि रतिबन्धुरनिष्ठुरत्वम् ॥ ४८ ॥

I still remember her charming tenacity in the sexual struggle without resorting to any weapons of fight, in which relying upon different positions of lying down, and getting up without any force of arms, in which blood propped up when lips were bit

by teeth and nails were pressed deep (on her breasts, hips, thighs etc.).

—बन्धोपबन्ध are the different positions described in कामशास्त्र according to which, पतन and उत्थान of the partners comes out automatically, without resorting to force That she bore all the activities of attack, with pleasure, shows her रतिनिष्ठुरत्व which is, of course, charming to the male partner, the poet.

अद्याप्यहं वरवधूसुरतोपभोगं जीवामि नान्यविधिना क्षणमन्तरेण।
तद्भ्रातरो मरणमेव हि दुःखशान्त्यै विज्ञापयामि भवतस्त्वरितं लुनीध्वम् ॥४९॥

Even now I cannot, for a moment, live by any other way without the sex-enjoyment of that excellent young girl. So, brothers! death is the only remedy for silencing this craving, I request you, therefore, to speedily cut off (my head))!

—Was it the दूरान्वय or the rather tedious repetition of सुरत, that caused the change in the reading of the first line? Our text is that found in com., but the vulgate and other Mss. read, instead: अद्याप्यहं वरवधूसुभगामि (or वि-)योगं शक्नोमि नान्यविधिना च कथं विसोढुम् which, we think, is not very happy. The last verb, too, is mostly read as लुनीहि!

अद्यापि नोज्झति हरः किल कालकूटं कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे।
अम्भोनिधिर्वहति दुःसहवाडवाग्निमंगीकृतं सुकृतिनः परिपालयन्ति ॥ ५० ॥

God Hara does not still give up the deadly poison; the Great Tortoise bears the Earth on his back; the ocean contains the unbearable Vadava fires; (in short) high-souled people stick to what they have once accepted.

—Second pāda has variant reading in Kashmir version: शेषो बिभर्ति धरणीं खलु मस्तकेन,—For पृष्ठभागे of our text, some Mss. read पृष्ठकेन.—The references here mentioned are related in Purāṇic accounts: When the oceans were churned for nectar, God Viṣṇu, in the form of Tortoise, lent support to the Earth, at the bottom; the churning brought forth the कालकूट poison, which threatened to destroy the creation; it was then swallowed by god Śiva; the poison made his neck black, and he is called नीलकण्ठ. About the Nether Fire, under the waters of the oceans, there are two accounts: Vedic tradition says that a sacrificial Fire named सौचीक, seeing his brothers destroyed by वषट्कार and हवि, hid himself under waters. Mahābhārata states that Fire was cursed by Bhṛgu, and being ashamed of his humiliation, hid under waters; the gods then persuaded him to come up and to take part in sacrificial rites, as usual.

परिशिष्ट १

पूर्वपीठिका

(औत्तराहपाठानुसारेण)

ध्यात्वा गणेशमखिलागमसारभूतं श्रीशारदां सुरनमस्कृतपादपद्माम्।
किंचित्स्वकीयमतिसंस्फुरितेन नव्यं काव्यं करोति विदुषां सुखबोधनार्थम् ॥१॥
स्वर्गावनीविमलमण्डलखण्डतुल्ये भूमण्डलेऽनहिलपत्तननामधेये।
वीराङ्गुर्जरजनैः परिसेव्यमानो भोगी बभूव नृपतिः किल वीरसिंहः ॥ २ ॥
चत्वार एवं निजधर्मरताः सदैव वर्णाश्च यत्र नगरे रजनीकरास्याः।
चञ्चद्वाक्षपथवीक्षणदृश्यवक्त्रैश्चन्द्रोदयं प्रकटयन्ति दिनेऽपि नार्यः ॥ ३ ॥
यो वैरिवीरवरवारणदर्पसिंहो विद्याविनोदविविधाभिरसः कलावान्।
गाम्भीर्यधैर्यगुरुदानगुणैः स लोकं पाति स्म वीरनृपतिर्निजराजधर्मैः ॥ ४ ॥
इत्थं नृपेण रजनीकरबिम्बवक्त्रा राज्ञोऽप्यवन्तिनृपतेरतुलस्य पुत्री।
पाणिग्रहेण विधिना विहिता सुतारा मुख्या बभूव सकलासु वराङ्गनासु ॥ ५ ॥
कालक्रमेण विमलां कमलासमानां चन्द्राननां नयननिर्जितपद्मपत्राम्।
चन्द्रोदयेऽथ नृपतेः किल पट्टराज्ञी जज्ञे कलां शशिकलामिव सत्यनाम्नीम् ॥६॥
सा वर्धते शशिकला शशिनः कलेव राज्ञो विशिष्टतनयादधिकैकभार्या।
अल्पैर्दिनैः कतिपयैरपि राजधानीमागत्य वाक्यसुधया जनकं तुतोष ॥ ७ ॥
तां वीक्ष्य चारुवदनां चतुराननस्य वाचामिव प्रचुरबन्धुरबुद्धिशीलाम्।
बालामबालगुरुरूपवतीं नरेशश्चिन्तां चकार तनयाध्ययनाय नित्यम् ॥ ८ ॥
राजीवपत्रनयना नरराजकन्या यल्लीलयापि वचनं मधुरं बभाषे।
तद्वीरभूधरपतेरमृतोपमानं चित्ते बभूव सुखदायि दिवा निशायाम् ॥ ९ ॥
इत्थं नृवीरनृपवीरवरस्य चित्ते नित्यं चकार कविराजपदानि कन्या।
तातस्तदीयगुणगौरवगाढचित्तश्चिन्तापरो गुरुतरं गुणिनं ददर्श ॥ १० ॥
श्रीराजवंशनमितेन पुरोहितेन राज्ञे न्यवेदि विदितेन विलक्षणेन।
काश्मीरकः कविरसौ गुणिनं दिदृक्षुस्त्वामागतः क्षितिप बिल्हणनामधेयः॥११॥
मुक्तेन्दुकुन्दकुमुदस्फटिकावदाता सर्वामरेन्द्रभुजगेन्द्रनरेन्द्रवन्द्या।
मन्त्रार्थतन्त्रजननी जननी श्रुतीनां श्रीशारदास्ति विषये तत आगतोऽयम् ॥१२॥
कृत्वार्हणं प्रणतिपूर्वमथाशिषं तां जग्राह वीरनृपतिः कविराजतोऽपि।
माया प्रपञ्चजगदर्णवभीतभीतः सिद्धोपदेशमिव धर्मपरो हि लोकः ॥ १३ ॥
पृष्ट्वा समस्तकुशलं कुलदेवताया आदिष्टवान्निजपुरोहितमस्य तृप्त्यै।
यद्रोचते सुकवये कुरुत प्रभूतं भोज्यान्नवस्त्रवितताय यथोपदिष्टम् ॥ १४ ॥

तस्मै विहस्य कवये द्रविणं क्षितीशः प्रीत्या सुताध्ययनकारणकोविदाय ।
दत्त्वा निकाममुदितेष्टमनोरथश्रीः श्रीवीरसिंहनृपतिर्मुदमाससाद ॥ १५ ॥
स्नानानुलेपनमनोहरभोजनानि दिव्याम्बराणि बहुमानपुरःसराणि ।
काश्मीरकः कविवरोऽथ निशम्य रात्रौ प्रातः पुरोहितयुतो नृपतिं ददर्श ॥१६॥
गद्यप्रबन्धविधिना गुरुणा कवित्वं कृत्वा च पद्यरचनां मधुरां कवीन्द्रः ।
विद्यापगागहनवासपयोधिधीरं वीरं तुतोष स यथा न तथान्य एव ॥ १७ ॥
एवं विलोक्य ललितार्थपदं कवीन्द्रमामन्त्र्य तत्र तनयां कवये निवेद्य ।
अध्यापय प्रमुदितो भगवन्निमां त्वं कृत्वा प्रसादमथ चन्द्रकलामुवाच ॥१८॥
उन्निद्रचारुकुसुमैः कविशेखरोऽयं काश्मीरकः शशिकले कुरु पादपूजाम् ।
क्रीडां विहाय शुकसारिगतां सखीनां शास्त्रं गृहाण वचनं कविबिल्हणस्य ॥१९॥
[सेनापतिः कविमभाषत वीरसिंहो होनायकां रचय सांप्रतमेव रम्यान् ।
सख्यावतीं सितगृहं सपरिच्छदं तदध्यापनाय न शशाङ्ककलार्थमस्ति ॥ १ ॥
श्रुत्वा तथेत्यभिहितं कविना क्षणेन भोज्यानि तत्र वसनानि तथासनानि ।
यानानि दास्य इतरेऽनुचरेषु मुख्यास्तत्प्राप्य स स्वभुजसंनिहितं च चक्रे ॥२॥
कृत्वेति वीरनृपतिः स्वसुतां करेण धृत्वा कवेरथ समर्प्य ननाम मूर्ध्ना ।
भूयः पुरोहितमथ स्वजनानवोचत्सर्वं मया सह सदा सुखिनो भवन्तु ॥ ३ ॥]
राज्ञो विमृश्य गुणिनो गुरुभावभक्तिं व्यक्ताक्षरक्रमवतीमपि राजपुत्रीम् ।
ज्ञात्वा व्यपाठयदतिप्रयतः कवीन्द्रः स्तोकैर्दिनैः शशिकला विदुषी बभूव ॥२०॥
सा प्राकृतानि विमलानि च संस्कृतानि शास्त्राण्यधीत्य किल चन्द्रकला सुशीला।
श्रीबिल्हणं निजगुरुं प्रणिपत्य साक्षात्तं हर्षयां नृपतिमास सरस्वतीं च ॥ २१ ॥
कन्यागृहे प्रचुरकुङ्कुमपुष्पवासे कर्पूरगौरसरसागरुचन्दनाढ्ये ।
शृङ्गारसारगहनं किल कामशास्त्रमध्यापयत्यमलचन्द्रकलां कदाचित् ॥ २२ ॥
विज्ञातमन्मथरसा स्मरबाणविद्धा तस्यान्यभावरमणी नरनाथपुत्री ।
भावार्थभावितमनोभवतुल्यकान्ता कान्ते रसान्विदधति स्म दृशोर्विकारान् ॥२३॥
[इत्थं विकल्प्य कविराट् पठितां स बालामन्तःपुरे जवनिकान्तरसंस्थितीं ताम् ।
मारज्वराकुलितमानस एव मन्ये मत्वा सखीं स्वसदृशीं कलितानुभावः ॥ १ ॥
जातं सुजन्म विफलं भुवने नलिन्या दृष्टं यया न विमलं तुहिनांशुबिम्बम् ।
श्रुत्वा कवेः सुवचनं मधुरं तदेव किंचिद्विहस्य तुहिनांशुकला बभाषे ॥ २ ॥
तुष्टानि कोकमिथुनानि भवन्ति नूनं सूर्यांशुभिर्जगदिदं निखिलार्थमेति ।
संपूर्णतापि शशिनः किल निष्फलेव दृष्टा न येन नलिनी परिपूर्णरूपा ॥ ३ ॥
इत्थं निशम्य स कविः सुवचोऽवशायाः प्रोवाच कामवशगः शृणु चन्द्रलेखे ।
मध्येऽत्र किं जवनिका कुरुतेऽरिभूता दूती कुरुष्व दयितेऽन्तरमेतदेव ॥ ४ ॥]

प्रेमादरात्तरलितेन विलोचनेन वक्त्रेण चारुहसितेन सुधाधरेण।
ईषद्विजृम्भितकुचद्वितयेन बाला विद्वांसमाशु वशिनं च वशीवकार ॥ २४ ॥
श्रीपद्मपत्रनयनां वरपद्महस्तां पद्मप्रकृष्टचरणां शुचिपद्मगन्धाम्।
तां पद्मिनीमिव सुपद्मनिकेतनां वा मेने कविः शशिकलामिव कामवल्लीम् ॥२५॥
सा प्राह तं कविमवेक्ष्य मनोनुरागं स्वामिन्द्वयं भवति सर्वजनोपशान्त्यै।
तत्त्वं शिवस्य शिवदायि च कामतत्त्वं त्वं संप्रति स्मरगुरुःस्मर योग्यमत्र ॥२६॥
[निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्।
उत्पत्तिरिन्दोरपि निष्फलैव दृष्ट्वा प्रहृष्टा नलिनी न येन ॥ १ ॥]
इत्युक्त एव विजनेऽथ विचार्य सर्वं गान्धर्वराजविधिना जगृहे स पाणिम्।
कामी युवा स्मरकलाकुशला च बाला दैवात्तयोरघटितं घटितं बभूव ॥ २७ ॥
सा कामशास्त्रविधिना किल कामकेलिः लीलाविलासनिलयं चकमे कवीशम्।
अन्योन्ययौवनविमोहभरप्रयुक्तैर्वाक्यैः सुधारसमयैश्च ननन्दतुस्तौ ॥ २८ ॥
राजप्रियोऽपि विविधागमपारगोऽपि भुङ्क्ते स गूढचरितो नरराजपुत्रीम्।
शास्त्रोदितान्यनुदितानि च मोहनानि पश्यन्नहर्विशमतीव विमूढचेताः ॥ २९ ॥
प्राह प्रियां स कविरेव मम प्रियेति सा तं कविं कथयति स्म मम प्रियस्त्वम्।
पृच्छाम्यहं यदि पुनः कथयोत्तरं मे त्वं चापि मे कथय नाथ कवीशमुख्य ॥३०॥
अङ्कणं तदिदमुन्मदद्विपश्रेणि शोणितविहारिणो हरेः।
उच्छसत्तरुणकेलिपल्लवां सल्लकीं त्यजति किं मतंगजः ॥ ३१ ॥
निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्।
उत्पत्तिरिन्दोरपि निष्फलैव दृष्टा प्रहृष्टा नलिनी न येन ॥ ३२ ॥
पूर्णेन्दुबिम्बसदृशं च नृपात्मजास्यमानम्य विद्रुमलतामिव चुम्बनाय।
कामप्रियव्रतनिविष्टतयातिगाढमालिङ्गनं सपुलकं प्रथमं चकार ॥ ३३ ॥
नीवीनिबन्धनविधानविमोचनाय नाभिप्रदेशनिहितः कविना प्रकोष्ठः।
कन्दर्पमन्दिरपिधानहरः करोऽस्य रुद्धः स तस्कर इव क्षितिराजपुत्र्या ॥३४॥
आश्लिष्य गाढमबलामुपनीय शय्यामारोप्य वक्षसि रदेन निपीड्य चोष्ठम्।
संवेश्यकेन चरणाग्रभवेन वस्त्रमाकृष्य चाकुलतया सुरतं चकार ॥ ३५ ॥
चन्द्रानना सुरतकेलिगृहीतवस्त्रा नेत्रे निरुध्य च करद्वितयेन तस्य।
आरोप्य मंक्षु शयने पुरुषायमाना सा नन्दयत्यति कराङ्गुलितर्जनेन ॥ ३६ ॥
सुकोमला चन्द्रमुखी च बाला प्रियं वदन्ती मधुराक्षराणि।
कृशोदरी गौरविशालनेत्रा ददातु मे शंकर जन्मजन्मनि ॥ ३७ ॥
पद्मानना चकितबालकुरङ्गनेत्रा मत्तेभकुम्भयुगलस्तनभारनम्रा।
काश्मीरकेन किल संपुटिताभिधेन बोभुज्यते स्मररणे नरराजपुत्री ॥ ३८ ॥

चञ्चत्प्रवालरुचिरारुणदन्तवासा दन्तप्रभाविजितहीरकदम्बशोभा ।
संतोष्यते तदनु पीडितकेन नाम्ना कान्तेन कान्तिकरणेन नरेन्द्रपुत्री ॥ ३९ ॥
चूतप्रवालकरपल्लवकेलिरम्या वामाङ्गना सुगतिनिर्जितराजहंसा ।
पद्मासनाद्यकरणैश्च मनोविनोदैः संगम्यते सुकविना क्षितिपालपुत्री ॥ ४० ॥
[लीलावशीकृतसमस्तसुरर्षिवर्यगन्धर्वयक्षपवनाशनसिद्धसंघाः ।
वात्स्यायनोक्तकरणैर्निखिलैर्मनोज्ञैः संभुज्यते कविवरेण नरेन्द्रपुत्री ॥ १ ॥]
उद्यन्मृगेन्द्रतनुमध्यरुषा वराङ्गी सर्वाङ्गदत्तसुमना सुभगा सुशीला ।
सा सिद्धतामुपगता नरराजपुत्री स्त्रीनैपुणं सुकविना बहु शिक्षिता च ॥ ४१ ॥
दोलारतानुकरणेन कवीश्वरस्य सा रम्यते रतिकलाकुशला निशीथे ।
लावण्यसिन्धुमुदिता रुदितानि कृत्वा तस्मै समर्पयदहो गुरुदक्षिणार्थे ॥ ४२ ॥
उन्निद्रचम्पकविशुद्धसुवर्णवर्णा कर्णान्तगस्मरसरोरुहचारुनेत्रा ।
रंरम्यते सुरतनागरिकेण नाम्ना श्रीबिल्हणेन कविना नरराजपुत्री ॥ ४३ ॥
तद्भावसूचितमनङ्गरसप्रसादं चाटूक्तितत्क्षणवियोगसुदुःसहं च ।
प्रेम प्रवृद्धमितरेतरमप्रमेयं कामं तयोरनुपमेयतरं बभूव ॥ ४४ ॥
उत्तुङ्गपीवरघनस्तनमण्डलेन बिम्बाधरेण रमणद्विजखण्डितेन ।
अङ्गेन कान्तपरिदत्तनखव्रणेन शुद्धान्तरक्षिभिरलक्षि वरोपभुक्ता ॥ ४५ ॥
आः कस्य सांप्रतमहो कुपितः कृतान्त कृत्वेति ते हृदि ततः प्रणिपत्य भूपम् ।
देवाभयं शशिकला पुरुषोपभुक्ता सत्याय ते स गुरुरीक्षित एव नूनम् ॥ ४६ ॥
रक्षाजनेन कविनामनिवेदितेन भूपो बभूव किल दोलितचित्तवृत्तिः ।
किं सत्यमस्ति कथितं वितथं तु किं वा जीवप्रियं द्वितयमेव कविः सुता मे ॥४७॥
[आकर्ण्य कञ्चुकिवरः क्षितिपालवाचमासीत्स संसदि यथा शरभिन्नवर्मा ।
संगोप्य बिल्हणकवेश्चरितेक्षणाय भूपोऽन्यदा शशिकलानिलयं जगाम ॥ १ ॥]
विद्यानवप्रयतमन्मथचाटुवाक्यैः कन्दर्पकेलिकुपितां नरराजपुत्रीम् ।
पुष्पेपुबाणमधुरीकृतमानसोऽयं कामी प्रसादयति चन्द्रकलां यथेष्टम् ॥ ४८ ॥
[सभ्रु त्वमेहि कुपितासि किमर्थमेषा शय्या त्वयाप्यपहता सुरभिस्रगाढ्या ।
कोपं विमुञ्च मयि रागिणि नम्रमौलौ भृत्ये प्रसीद भवति विरहाद्विशोऽन्धाः ॥१॥]
यावत्प्रसादयति तां नृप आह तावत्कां तां प्रसादयसि दुष्टचरित्र भावैः ।
श्रुत्वेति लक्षचरितो निजचौर्यगुह्यै कामी दृशं निजकरेण ममर्द शीघ्रम् ॥ ४९ ॥
उत्थाय संमुखगतोऽक्षिशिरोऽवगुम्फ्य तं प्राह धीरमनसा नृपतिः सचक्षुः ।
कान्तापि तापयति यः कुपितो जनोऽयं येन प्रसादयति देव विचारयार्थम् ॥५०॥
[काव्यं कवेरिति निशम्य निरीक्ष्य पुत्रीमर्थं विचार्य बहुधा नृपतिः प्रतीतः ।
श्रीभारतीविषयवासिविलासलीलाभिज्ञं जगाद तमिति क्षमतां यदुक्तम् ॥१॥

पुत्र्री नृपस्य शरणाथमथ प्रणम्य प्रोवाच गद्गदवचः शृणु तात तत्त्वम् ।
विद्याधिको मम गुरुर्गुणवद्भिभाति तद्वीक्षितं गुणवतो मयि न क्षमन्ते ॥ २ ॥
भूपे गते स्म वदतीन्दुकलां स भीतां कान्ते ममाप्युभयथा कुशलं दुरापम् ।
मृत्युस्त्वदीयविरहाद्यदि यामि देशं नान्यद्यथात्र यदि वेत्ति पिता तवेदम् ॥ ३ ॥]
भिज्ञा प्रियस्य वचनं तदिदं निशम्य वातोद्धतेव सहसा कदली चकम्पे ।
तूर्णं चकार रमणस्य निरीक्षणं सा ताम्बूलशोभितकरापि वराङ्गनानाम् ॥ ५१ ॥
श्रेयो वरं मयि न जीवितनाथ नाथ त्वं किं परित्यजसि मामकृतापराधाम् ।
सूक्ष्माति धर्मगतिरस्ति विचारय त्वं जीवामि किं रमण ते विरहान्मुहूर्तम् ॥५२॥
सौदामिनी भवति किं जलदे प्रयाते ह्यस्तं गते शशिनि तिष्ठति चन्द्रिका किम् ।
हे जीवितेश रतिदायक कामरात जीवामि न क्षणमदर्शनतस्तवाहम् ॥ ५३ ॥
बालेयमेव शरणं मरणेऽपि भूयान्मृत्युर्भविष्यति जनस्य च मादृशस्य ।
भूयाद्विपत्तिरिह राजसुतानिमित्ते धर्मस्तदेति सुदृढं हृदयं चकार ॥ ५४ ॥
निर्वासनं स्वनगरात्खरपृष्ठयानं नाशं करस्य वधबन्धनकं समस्तम् ।
अङ्गीचकार कुसुमेषुनिपीडिताङ्गः काश्मीरको नृपसुतारमणाय गूढः ॥ ५५ ॥
खेदं न याति दधति स्वजने न लज्जां ये स्त्रीरताः किल भवन्ति नरा विमूढाः ।
सत्यां सती परममूर्तिमतीव गङ्गां वामाङ्ग एव वहति त्वशिवः शिवोऽपि ॥५६॥
अङ्गीविधाय स शिवं च शिवेतरं च काश्मीरकः शशिकलां रमते तथैव ।
भूयः कविः कतिपयेषु दिनेषु दूतीवक्त्रेण तेन गदितश्च पुरोहितेन ॥ ५७ ॥
अलमति चपलत्वात्स्वप्नमायोपमत्वा—
त्परिणतिविरसत्वात्संगमेनाङ्गनायाः ।
इति यदि शतकृत्वस्तत्त्वमालोचयाम—
स्तदपि न हरिणाक्षी विस्मरत्यन्तरात्मा ॥ ५८ ॥
के वा न सन्ति भुवि वारिरुहावतंसा हंसावलीवलयिनो जलसंनिवेशाः ।
किं चातकः फलमवेक्ष्य स वज्रधारां पौरंदरीं कलयते नवधारिधाराम् ॥ ५९ ॥
श्रुत्वा कवीन्द्रवचनं नृपपूज्यविप्रो राजान्तिकं पुनरगाच्छ्रुतसर्ववृत्तः ।
संप्राप्य भूपमितरेषु जनेष्वसत्सु ह्रूचे मनोगतवचश्च पुरः पुरोधाः ॥ ६० ॥
श्रीवीरसिंह नृपवीर विपक्षवीर मत्तेभकुम्भरिपुसिंहसमानसार ।
वैदेशिकः स्वकुललाञ्छनमातनोति श्रुत्वापि तत्खलु भवान्क्षमतेऽत्र चित्रम् ॥६१॥
वंशार्चितेन कथिते वचने नृवीरो जज्वाल वह्निरिव वातविवृद्धवेगः ।
आहूय तत्प्रियसखीश्चरितं च पृष्ट्वा ताभ्यः समस्तमपि भूपतिराससाद ॥ ६२ ॥
ज्ञात्वा स्वयं सकलमर्थमनर्थमूलं प्रोवाच रोषवशगः शुभमन्त्रिणस्तान् ।
चौरस्य किं भवति शासनमत्र योग्यं शूलाधिरोहणमिति प्रतिपादितं तैः ॥ ६३ ॥

भूपाज्ञया सपदि वर्षधरैर्विगाढं तं नीयमानमुपलक्ष्य जनस्ववोचत् ।
चौरः किमेष सुकविः प्रभुरत्नहारी लोकोक्तिरेवमभवन्नगरे समस्ते ॥ ६४ ॥
द्वारि स्थितामथ निरीक्ष्य नरेन्द्रपुत्रीं नेत्रच्छटां प्रदधतीं स उवाच कान्ताम् ।
बालेऽधुना सुरवधूरमणाय यामि नैवागमिष्यति पुनः कविबिल्हणस्त्वाम् ॥६५॥
नार्यो नरेन्द्रतनयागुरुवीक्षणार्थमाजग्मुराशु गमनेऽपि विलासवत्यः ।
काचित्करेण दधती परिधानवस्त्रं काचिद्विमुञ्चति करादपि कञ्चुकीं स्वाम् ॥ ६६ ॥
काचिन्निजोष्ठगतरक्तिमवीक्षणार्थमादर्शमेव दधती स्वकरेण चान्या ।
काप्यङ्गनार्धरचितां कबरीं करेण पीनोन्नतस्तनतटान्तरितां दधाति ॥ ६७ ॥
एकं विधाय जतुरङ्गविरञ्जितं च पादं द्वितीयमपरा परिहाय यान्ती ।
आनक्ष नेत्रमपरा न सुकज्जलेन तद्दर्शनाहृतमना हि ययौ गवाक्षम् ॥ ६८ ॥
तद्दर्शनाय विविधा द्विजराजयस्ता नानाविधाश्च विबुधा अपि बाहुजाश्च ।
वैश्याश्च सेवकजना नृपसेवकाश्चेत्यन्ये प्रदुद्रुवुरहो विधिरेवमुक्त्वा ॥ ६९ ॥
ताम्बूलमेव दधती स्वकरेण कापि हारावलीविरचनोचितसूत्रहस्ता ।
आलिङ्ग्य बाहुलतया स्वसखीं च कण्ठे काचिच्च गच्छति गवाक्षपथं कृशाङ्गी ॥७०॥
[धृत्वा करेण गमनात्परिधानवस्त्रं स्रस्तं सितं कटितटाद्वशनां विमुच्य ।
नाभिप्रविष्टनिखिलाभरणप्रभेण वातायने स्थितवती ददृशे च काचित् ॥ १ ॥
काचित्स्तने निपतितं करमम्बुजाक्षी भर्तुर्विहाय सहसा गतकञ्चुकापि ।
श्रुत्वा चचाल पटहध्वनितं गवाक्षजालान्तरेण तमपश्यददृश्यमाना ॥ २ ॥
सैरन्ध्रिकासमनुरञ्जितमङ्घ्रिमेकमुत्क्षिप्य पावकरसं किरती तथान्या ।
लीलाविलासगमनेन मनो हरन्ती प्रोद्दामनूपुररवा चलिता गवाक्षम् ॥ ३ ॥]
कामी स चापि नरराजनिदेशतस्तैर्वध्यावनीं प्रति गणैरपि नीयमानः ।
दृष्टो जनैः सकरुणं नगराङ्गनाभिरुक्तं तदा शिव शिवेति विमोचयैनम् ॥ ७१ ॥
वध्यावनीमथ निरोपितशूलरौद्रां नीत्वा कवेः तु वधकाः कथयांबभूवुः ।
स्नानं विधेहि परिचिन्तय देवमाद्यमन्ते मतिर्भवति या सुकवे गतिः सा ॥ ७२ ॥
[इत्थं समस्तजनमध्यगतो विहाय तां शुद्धबुद्धिमखिलां न च किंचिदूचे ।
तूष्णीं स्थितं तमवलोक्य पुनस्तमूचुरद्यापि न स्मरसि किं जगदादिमेकम् ॥ १ ॥]
संसारदुस्तरपयोनिधितारणाय ध्यायन्ति यं विविधयोगरता मुनीन्द्राः ।
यः सर्वलोकहृदयाम्बुजकोशहंसस्तं सर्वगं स्मर सदैव विमुक्तिहेतुम् ॥ ७३ ॥
लोकोक्तिषु स्थितवतीषु जनेषु सत्सु तामेव पश्यति पुरोऽपि च पृष्ठतोऽपि ।
चित्ते स्थितामथ नरेशसुतां विहाय नाद्यापि पश्यति कविः स्वहितं तदन्यत् ॥७४॥

॥ इति श्रीबिल्हणकविकृतचौरपञ्चाशिकायां पूर्वपीठिका समाप्ता ॥

परिशिष्ट २

॥ बिल्हणचरितपूर्वपञ्चाशत् ॥

(दक्षिणात्यपाठानुसारेण)

पृथ्वीमण्डलनाभिभूतकनकाद्रेरुत्तरस्यां दिशि
प्रायः सज्जनसङ्कराजितमहापाञ्चालदेशोऽभवत् ।
लक्ष्मीमन्दिरनाम पट्टणमभून्नानासुखैकास्पदं
तत्रासीन्मदनाभिरामनृपतिर्भूपालचूडामणिः ॥ १ ॥

मन्दारमाला तस्यासीन्महिषी सुगुणा तयोः ।
यामिनीपूर्णतिलका तनया विनयोज्ज्वला ॥ २ ॥

आसीद्यौवनशालिनी मधुरवाक् सौभाग्यभाग्योदया
कर्णान्तायतलोचनाऽतिचतुरा प्रागल्भ्यगर्वान्विता ।
रम्या बालमरालमन्थरगतिर्मत्तेभकुम्भस्तनी
बिम्बोष्ठी परिपूर्णचन्द्रवदना भृङ्गालिनीलालका ॥ ३ ॥

दृष्ट्वा तां मदनाभिरामनृपतिः पुत्रीं पवित्रां स्वयं
संगीताम्बुनिधेः सुधाकरकलां साहित्यहीनां तदा ।
आलोच्यात्मनि सर्वकाव्यनिपुणा कार्या मयेति ध्रुवं
निश्चित्याशु परं प्रधानपुरुषं चाहूय संपृष्टवान् ॥ ४ ॥

यामिनीपूर्णतिलका संगीतनिपुणाऽभवत् ।
साहित्यविद्या स्वभ्यस्या युवत्या प्रौढयाऽनया ॥ ५ ॥

मुखमखिलं नयनयुगं वक्षः सर्वं पयोधरद्वन्द्वम् ।
मध्यमशेषं गगनं तस्याः शिक्षाविधौ सभर्थः कः ॥ ६ ॥

देवैरालोच्यतां सम्यक् संतिष्ठन्तेऽखिला बुधाः ।
तानाहूयाधुना सर्वान्बहुवारं परीक्ष्यताम् ॥ ७ ॥

तथैव भूयादिति सर्वशास्त्रशस्ताशयांश्चारुचरित्रयुक्तान् ॥
आहूय सर्वान्विबुधान्नरेन्द्रः पप्रच्छ युष्मासु फलं किमस्ति ॥ ८ ॥

तर्के व्याकरणे पुराणविषये वेदान्तशास्त्रेऽखिले
वेदे तत्पदपाठतत्क्रमजटारोहावरोहे वयम् ।
स्वभ्यस्ता नववादमुख्यवचनप्रौढप्रयोगान्विता
नैवं वक्तुमुपक्रमेत विबुधानीदृग्विधान् सज्जनान् ॥ ९ ॥

तदा यूयं सर्वे मम वरसुतां काव्यनिपुणां
रसालंकारज्ञां कुरुत नितरामेवमुदिते ।
रसज्ञा न स्यामो वयमुत रसज्ञास्तु कवयः
कवित्वं नो नास्ति प्रविशति कथं छान्दसकुले ॥ १० ॥
नैव व्याकरणज्ञमेव पितरं न भ्रातरं तार्किकं
दूरात्संकुचितेव गच्छति पुनश्चण्डालवच्छान्दसम् ।
मीमांसानिपुणं नपुंसक इति ज्ञात्वा निरस्यादरा-
त्काव्यालंकरणज्ञमेव कविताकन्या वृणीते स्वयम् ॥ ११ ॥
रसालंकारनिपुणः सर्वकाव्यविचक्षणः ।
छन्दोनाटकतत्त्वज्ञः को वा कविरुदीर्यताम् ॥ १२ ॥
मल्हणो बिल्हणश्चेति विद्येते सत्कवीश्वरौ ।
तत्राऽपि बिल्हणो नाम कविराट् कथ्यते बुधैः ॥ १३ ॥
वासः शुभ्रमृतुर्वसन्तसमयः पुष्पं शरन्मल्लिका
धानुष्कः कुसुमायुधः परिमलः कस्तूरिकाख्यं धनुः ।
वाणी तर्करसोज्ज्वला प्रियतमा श्यामा वयो यौवनं
मार्गः शाङ्कर एव पञ्चमलया गीतिः कविर्बिल्हणः ॥ १४ ॥
आगत्य सद्बिल्हणनामधेयः कविः सुधर्माख्यसभान्तराले ।
ददौ सुरेशाय गुरुर्यदाशिषं जगौ तदाशीर्वचनं महीपतेः ॥ १५ ॥
विद्वन् राजशिखामणे सुखमहो सौख्यं प्रसादात्तव
प्रीत्या ख्यातिरमीभिरेव कथिता नास्माभिरालोकिताः ।
यूयं चेति निरूपिते नृपतिना तत्कालमस्मिन्पुरे
सद्विद्याव्यसनेन कालमनयं त्वामद्य संदृष्टवान् ॥ १६ ॥
तदा नरेशः कविपुङ्गवाय स्वकण्ठहारादिसमस्तभूषाः ।
दुकूलवस्त्रद्रविणं यथेष्टं दत्त्वोचितं प्रेषितवान्गृहाय ॥ १७ ॥
आकारे मदनः सुकाव्यरचनाचातुर्ययुक्तौ गुरुः
सद्भाषास्वपि दृश्यते च चतुरस्तं दृष्टवत्यः स्त्रियः ।
स्वप्राणेश्वरसंगमं सुखकरं त्यक्त्वा न जीवन्त्यहो
तस्यान्ते सुकुमारया तनयया भ्यासः कलानां कथम् ॥ १८ ॥
तरुणीकल्पवृक्षस्य तस्य तारुण्यमञ्जरी ।
आकर्षत्यायताक्षीणामन्तःकरणषट्पदान् ॥ १९ ॥
एवं वदति राजेन्द्रे प्रधानो नृपमब्रवीत् ।
तथापि शास्त्राभ्यासोऽस्माद्विधेयो ननु भूपते ॥ २० ॥

एनं विना न कोऽप्यस्ति मत्पुरे सरसः कविः ।
किं कुर्मः कपटोपायः कथ्यतां नीतिकोविद ।। २१ ।।
भवद्भिर्ज्ञातसर्वस्वैर्देवैरेव विचार्यताम् ।
तस्योपायस्तथा भूयस्त्वया पूर्वमुदीर्यताम् ।। २२ ।।
तयोर्व्रतद्वन्द्वमिहास्ति नान्धमुखावलोकं कुरुते कुमारी ।
स विल्हणः कुष्ठशरीरदर्शनं कुर्यात्कदा नेति मया श्रुतं विभो ।। २३ ।।
पुत्री कुष्ठगतेति विल्हणकवेराचक्ष्व तस्याः कवि-
र्जात्यन्धः प्रतिपादयस्व नितरां श्रुत्या तदुक्तं वचः ।
तौ श्राव्याविति चाप्तताश्च युवयोर्मध्ये ह्यदृग्गोचरं
बध्वा काण्डपटं ददामि तदिदं ह्यभ्यस्यतामुच्यताम् ।। २४ ।।
यदुक्तं भवता मन्त्रिंस्तथैव क्रियतेऽधुना ।
इत्युक्त्वाकारयामास कुमारीं कोमलाकृतिम् ।। २५ ।।
आगत्य सा मन्मथमन्त्रदेवता समानरूपा पितुरन्तिके स्थिता ।
तां वीक्ष्य शास्त्रश्रवणं विधेयं त्वया भवित्यवदत्कुमारी ।। २६ ।।
जात्यन्धको बुधश्रेष्ठो बिल्हणाख्योऽस्ति मत्पुरे ।
तस्यान्ते क्रियतां सर्वकलाभ्यासो यथासुखम् ।। २७ ।।
जन्मादितोऽन्धकमुखं न पश्यामीति मे व्रतम् ।
तथा चेद्युवयोर्मध्ये काण्डं दास्यामि यद्भवेत् ।। २८ ।।
इत्यङ्गीकृतवचनां तनयां चाहूय बिल्हणकविं च ।
कुष्ठगता मत्पुत्री सर्वकलाकोविदा त्वया कार्या ।। २९ ।।
साधूक्तं नृपशेखर नोद्वीक्ष्ये कुष्ठरोगिणो मुखमहम् ।
भूयाद्युवयोरपि चेन्मध्ये दास्यामि यवनिकां बध्दवा ।। ३० ।।
स्वामिंस्त्वयैवं निर्बन्धे कृते किं करवाण्यहम् ।
तदा भवतु मद्भक्त्या विद्यां दास्यामि भूपते ।। ३१ ।।
इतीरितं वचः श्रुत्वा प्रेषयामास बिल्हणम् ।
मन्त्रिंस्त्वदीरितोपायः साध्वभूदित्यभाषत ।। ३२ ।।
ततः समाहूय निमित्तकोविदान्मुहूर्तमालोच्य शुभंकरं परम् ।
विरच्य गेहं बहुचित्रचित्रितं तदन्तरे काण्डपटं बबन्ध हि ।। ३३ ।।
तत्रागत्य नराधिपः शुभदिने मन्त्रीन्कवीन्सद्बुधा—
नध्यक्षान्स्वसुतां च बिल्हणकविं शीघ्रं समानीय तान् ।
वाग्देवीपरिपूजनं प्रथमतः कृत्वा तु रामायण—
प्रारम्भं कृतवान्स बिल्हणकविः स्वस्तीकृतानुग्रहः ।। ३४ ।।

ततस्तु राजा सर्वेषां बुधानां वस्तुवाहनम् ।
वस्त्रादीन्युचितं दत्त्वा स्वगृहान्प्राहिणोदथ ॥ ३५ ॥
तत्रादराद्भरपतिर्वरभोजनं च
ताम्बूलवस्त्रशयनासनसंहतीश्च ।
कृत्वामितं प्रतिदिनं कुरतात्र शास्त्रा—
भ्यासं निकेतनमगादिति संजगाद ॥ ३६ ॥
तदा च बिल्हणकविः स्सर्वशास्त्राणि सर्वदा ।
निरूपयत्यग्रहीत्सा तल्लोहमित्रोदकम् ॥ ३७ ॥
नानालङ्कारभेदे नवरससुरभे भानुसंभक्तयुक्ते
काव्ये नानार्थशास्त्रे सुजनजनमते नाटकैकप्रशस्ते ।
स्वच्छच्छन्दोब्धिपारे बहुसुखविषये कामदे कामशास्त्रे
प्रौढासीद्विल्हणादप्यधिकमतियुता राजपुत्री पवित्रा ॥ ३८ ॥
अथैकदा कामसहायभूते वसन्तमासे परिपूर्णिमायाम् ।
प्रकाशितानेकदिगन्तरालश्चन्द्रोदयोऽभूत्किरणैः स्वकीयैः ॥ ३९ ॥
मारनाराचनिर्माणशाणचक्रमिवोदितम् ।
यामिनीकामिनीकर्णकुण्डलं चन्द्रमण्डलम् ॥ ४० ॥
इदं कुमुदभेदनं मदनमान्द्यविच्छेदनं
वियत्तिमिरवारणं विरहकामिनीमारणम् ।
समुल्लसति पूर्वराद्युदयकन्दरादैन्दवं
पुरन्दरदिगङ्गनाश्रवणकुण्डलं मण्डलम् ॥ ४१ ॥
स्वैरं कैरवकोरकान्विदलयन्यूनां मनः खेलय-
न्नम्भोजानि निमीलयन्मृगदृशां मानं समुन्मूलयन् ।
ज्योत्स्नां कन्दलयन् दिशो धवलयन्नम्भोधिमुद्वेलय-
ल्लोकानाकुलयंस्तमः कवलयन्निन्दुः समुज्जृम्भते ॥ ४२ ॥
शय्यागेहे शयनतलतो बिल्हणाख्यः कवीन्द्र-
श्चन्द्रं दृष्ट्वा नयनसुभगं जालमार्गप्रविष्टम् ।
पृथ्वीभागे विरहिवितती कामसंतानबीजं
चित्तोद्भूतप्रबलतरमुदा वर्णयामास पूर्णम् ॥ ४३ ॥
नक्षत्रेश त्वदुदरगतं चिह्नमेके वदन्तु
भाषन्तेऽन्ये शश इति परे कोमलाङ्गं चमूरुम् ।
मन्ये कान्ताधरदलविधावग्रहीत्कुक्षिसंस्थं
तत्पीयूषं तव विधिरहो कालिमासीत्तदादि ॥ ४४ ॥

नेदं नभोमण्डलमम्बुराशिर्नैमाश्र तारा नवफेनखण्डाः ।
नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः ॥ ४५ ॥
अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन्परे ।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे ॥ ४६ ॥
प्राचीभागेऽनुरागे तरणिविरहिणि क्रान्तमुद्रे समुद्रे
निद्रालौ नीरजालौ धृतमुदि कुमुदे कोकलोके सशोके ।
आकाशे संविकाशे तमसि शर्ममिते निर्विचारे चकोरे
कन्दर्पेऽनल्पदर्पे विकिरति किरणाञ् शर्वरीसार्वभौमः ॥ ४७ ॥
चन्द्रमण्डलसुरङ्गया जगन्मन्दिरे मदनदस्युरागतः ।
मानवित्तमपहर्तुमुद्यतो मोहभस्मकलिकेव चन्द्रिका ॥ ४८ ॥
आकाशशाणे शरदाभिरामे राशीकृतं चन्दनमिन्दुबिम्बम् ।
तदन्तरा लेपयितुं विकीर्णः कस्तूरिकारेणुरयं कलङ्कः ॥ ४९ ॥
क्व काणः क्व कलङ्की च कथं वा तस्य दर्शनम् ।
एतदाश्चर्यकं मत्वा स्वमनस्यन्वचिन्तयत् ॥ ५० ॥
अनन्धोऽयं भवेत्सर्वमेतज्जनकक्त्रिमम् ।
व्रतभङ्गो मम स्याद्वा तं पश्यामीत्यमन्यत ॥ ५१ ॥
उत्थाय शय्यातलतः कूतूहलान्नीत्वा स्वपर्यङ्कतलस्थकाण्डम् ।
दृष्ट्वा स्वहस्तद्वितये गवाक्षात्कृतोदयं चन्द्रमसं निरैक्षत ॥ ५२ ॥
यामिनीपूर्णतिलका पश्यन्ती बिल्हणं तदा ।
पञ्चबाणशराहत्या मूर्च्छां परमवस्थिता ॥ ५३ ॥
इतः कवीश्वरो दृष्ट्वा काण्डवल्लोपरि स्थितम् ।
वक्त्रं पूर्वाचलादुद्यत्प्रालेयांशुमिवोदितम् ॥ ५४ ॥
किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं
किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ ।
खगौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ
तडिद्वा तारा वा कनकलतिका वा किमबला ॥ ५५ ॥
नेदं मुखं मृगविमुक्तशशाङ्कबिम्बं नेमौ स्तनावमृतपूरितहेमकुम्भौ ।
नैवालकावलिरियं मदनास्त्रशाला नैवेदमक्षियुगलं निगलं हि यूनाम् ॥५६॥
ध्वान्तानां पटलं सुधांशुशकलं कोदण्डमिन्दीवरे ।
पत्रं कोकनदस्य कम्बुलतिके कुम्भा नभः स्सैकते ।

रम्भे काहलिके सरोजयुगलं संभूय सर्वं क्वचि-
त्पञ्चेषुं भवदग्धमङ्कुरयते भावंगमैर्विभ्रमैः ॥ ५७ ॥
मनो मे नायातं कठिनकुचयोरन्तरगतं
तदुद्धर्षाध्वस्तं किमुत विरहाग्नौ निपतितम् ।
तरुण्या लावण्यामृतसरसि मग्नं किमथ वा
चरन्मारश्चोरः किमु समहरद्यौवनवने ॥ ५८ ॥
आस्तां मण्डलमैन्दवं वरतनोर्वक्त्रश्रियश्चेत्कथा
कोणे कुत्रचिदास्यतां कुवलयान्यक्ष्णोः प्रसङ्गो यदि ।
दूरे तिष्ठतु वल्लकीकलरवः प्रस्तावना चेद्गिरां
वार्तां चेदवलम्बदेशयशसां व्योम्नः प्रभायै नमः ॥ ५९ ॥
एवं वर्णयति कवौ तद्वाक्यामृतबोधिता सुदती ।
पश्चात्तन्मुखचन्द्रं दृष्ट्वा लज्जाभराद्विनता ॥ ६० ॥
यद्यहं लघुचित्तेन निर्गच्छामि तदन्तिकम् ।
स्वीकरोति न वा तस्य मनो न ज्ञायते मया ॥ ६१ ॥
इत्थं चेतसि संविचार्य विकला सा राजपुत्री यदा
त्यक्त्वा काण्डपटं तदा निपतिता शय्यातले मन्मथे ।
तूणाद्बाणततिं विकृष्य सृजति ज्ञात्वा स्वजीवात्वयं
रक्ष त्वं चतुराननेति वचनं श्रुत्वा कवीशोऽ वदत् ॥ ६२ ॥
इन्दीवराक्षि तव तीक्ष्णकटाक्षबाणपातव्रणे द्विविधमौषधमेव मन्ये ।
एकं त्वदीयमधरामृतपानमन्यदुत्तुङ्गपीनकुचकुङ्कुमपङ्कलेपः ॥ ६३ ॥
तस्याङ्गीकरणं ज्ञात्वा राजपुत्री प्रमोदिता ।
उत्थाय शीघ्रादागत्य गाढालिङ्गनमातनोत् ॥ ६४ ॥
स्रस्ता नीवी न खलु सहसा नन्वियं मुक्तबन्धा
स्रस्तुं नैवेच्छति कुचपटीमात्मना सा विभिन्ना ।
दृष्ट वक्त्रं नमयति यतः स्वैरमुल्लोचनान्तं
व्रीडां तस्या विफलयति वै कोपि भावानुबन्धः ॥ ६५ ॥
आमग्ना किमपाङ्गवीक्षणमिषादानन्दवारां निधौ
कर्णालापपदेन किं कृतवती कर्णान्तरे गाहनम् ।
गाढाश्लेषवशादनङ्गविवशा चित्तं प्रविष्टा नु किं
तन्वी किं बहुना रसेन मिलिता याता किमेकात्मताम् ॥ ६६ ॥
मुखरवलयजालैर्मोदिताशेषगात्रैः पुलकमुकुलसन्दैर्बोधितानङ्गतन्त्रैः ।
चरमुरसि निमग्नस्फारवक्षोजकुम्भः सुखयति सुमुखीनां दोर्लतागाढबन्धः ॥६७॥

ईषन्मीलितलोचना श्लथसमस्ताङ्गा श्रमोद्रेकतो
निश्चेष्टा प्रथमं विमुक्तरशना सुव्यक्तकण्ठस्वना ।
प्रोद्यत्कामकला निजोरुनिलया निर्लज्जिता कामिनी
कान्ता कालवशादुपैति वशतां कान्तस्य कान्तेक्षणा ॥ ६८ ॥

मेघो वर्षति मीनकेतुविशिखानभ्रं समुत्कम्पते
धत्ते मौक्तिकजालमिन्दुरयते तारल्यमिन्दीवरे ।
शङ्खश्चानुकरोति हन्त शनकैः पारावतप्रक्रियां
तारं भ्राम्यति चक्रवाकयुगलं चित्रं विधानं विधेः ॥ ६९ ॥

दायादाः शरदिन्दुकान्तिविशदाश्चन्द्रं परिष्कुर्वते
शङ्खस्याशयसंभवाङ्कयुगलं प्राप्नोति संकोचिताम् ।
नृत्यन्ति प्रतिपक्षवस्तुनिवहा मायागृहे तेजसां
केशान्ते गिरिधन्वनःसमयते खेदं गभीरावटः ॥ ७० ॥

भ्रान्तिपयः परिणामान्निदशाहारात्तदीयसूतिकागेहात् ।
उच्चलति खं विहीन तदुर्णं विभ्रमति गिरियुगलं चित्रम् ॥ ७१ ॥

विलसत्यचिररुचाप्यमृतरुचा भाति घर्मबिन्दुरुचा ।
पयोमुचा प्रसवमुचा विमुचा किं च तारहारमुचा ॥ ७२ ॥

स्वच्छाङ्गी नवमार्जना विलसितेवोल्लासिता सात्मना
ज्योत्स्नापूरितपाण्डुराम्बरधरा रात्रिर्यथा शारदी ।
बिभ्राणा करपल्लवेन कबरीमारादियं दृश्यते
श्रीशृङ्गारसुधापयोधिसलिलादभ्युद्यतेवापरा ॥ ७३ ॥

दम्पत्योःशयनस्थयोः प्रणयतो जाते महाविग्रहे
वैमुख्यं समभूत्तदैव मदनावस्थां क्षणं योजितौ ।
नो दूती विरहे बली दहति तौ शय्या परिस्पन्दते
तत्राच्छादनमेव तावदुभयोः स्नेहं व्यधात्पुण्यतः ॥ ७४ ॥

उग्रग्राहमुदन्वतो जलमतिक्रामत्यनालम्बने
व्योम्नि भ्राम्यति दुर्गमं क्षितिभृतां मूर्धानमारोहति ।
व्यासं याति विषाकुलैरहिकुलैः पातालमेकाकिनी
कीर्तिस्ते मदनाभिराम कृतकं मन्ये भयं योषिताम् ॥ ७५ ॥

सुभ्रु त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषितां
दूरादेव विसर्जिताः सुरभयः स्रग्गन्धधूपादयः ।
कोपं रागिणि मुञ्च मय्यवनते दृष्ट्वा प्रसीदाधुना
सत्यं त्वद्विरहाद्भवन्ति महिते सर्वा ममान्धा दिशः ॥ ७६ ॥

अंगमेतदिदमुन्नतद्विपश्रेणिशोणितविहारिणो हरेः ।
उल्लसत्तरुणवारणां प्रियां वल्लकीं त्यजति किं मतङ्गजः ॥ ७७ ॥

नानाराजकुमारकान्पृथुतरान्संहूय मन्मद्विरे
बद्धे चारुतरे स्वयंवरगृहे चित्तानुवृत्त्या तव ।

त्वां दृष्ट्वा सुखवान्भवामि मनसा संचिंत्य सुस्थे मयि
त्वं मद्वंशकलङ्कमङ्कुरयसे किं वा करोम्यात्मजे ॥ ७८ ॥

इत्युक्ता मदनाभिरामनृपतिं तं प्रत्युवाचात्मजा
स्वामिन् सर्वमिदं त्वयैव हि कृतं यत्क्रत्रिमं तेऽधुना ।
चित्तक्लेशकरोऽभवन्मम पुनर्ज्ञातं कथं वा त्वया
बद्धः काण्डपटो धृतांशुकमभूत्पाणिग्रहेऽप्यावयोः ॥ ७९ ॥

इत्युक्तायां सुतायां नरपतिरवदत्पुत्रिकारुण्यबुद्धया
पित्रा संपन्नया तत्सकलमनुचितं संसहेत प्रवृत्तम् ।
सर्वां त्यस्का कुबुद्धिं स्थिरतरहृदया भूः प्रदास्यामि पश्चा-
त्सद्वंशोत्थाय भूपालकतनयवरायेत्यभाषिष्ट साऽपि ॥ ८० ॥

देव त्वं शृणु चित्रनेत्ररसनाघ्राणश्रुतिस्पर्शना-
न्यासंस्तद्वशवर्तितानि नितरामेवं मदीयानि वै ।
कर्णे यच्छसि चेतनाविरहितं कार्यं मया चोदितं
श्रुत्वा तत्पृथुरोषतो नरपतिर्वैगादगात्तत्सभाम् ॥ ८१ ॥

स्थित्वासने भूपतिरित्युवाच स कोपपालं प्रति गच्छ बिल्हणम् ।
बद्ध्वा शिरश्छेदय शीघ्रमेनं त्वं गच्छ गच्छेत्यवदत्त्रिवारम् ॥ ८२ ॥

कोपेन शिक्षितुं शक्तो यः प्रसादेन रक्षितुम् ।
स एव राजा लोकस्य नेतरो वीतकल्मषः ॥ ८३ ॥

साधु देव त्वया प्रोक्तं तत्समस्तं करोम्यहम् ।
तथापि स्वामिभिः कार्या योग्यायोग्यविचारणा ॥ ८४ ॥

इतीरिते कोपपाले निग्राह्य प्राहिणोद्वधम् ।
बध्द्वा त्वं बिल्हणं शीघ्रं छेदयेति शिरः पुनः ॥ ८५ ॥

अयि किमनिशं राजद्वारे समुन्नतकन्धरे
कुवलयदलस्निग्धे मुग्धे विमुच्य विलोचने ।
भ्रमरतरुणीलीलावल्गद्विलोचनवागुरा-
वलयपतितो न व्यावृत्तिं प्रयास्यति बिल्हणः ॥ ८६ ॥

कोपपालश्च राज्ञा च चोदितस्त्वरयान्वितः ।
बध्द्वा श्मशानं गतवान् बिल्हणं मुदितं तदा ॥ ८७ ॥

गत्वा श्मशाननिलयं वरबिल्हणाख्य-
स्तत्रोपविश्य सकला दिश आविलोक्य ।
मन्दस्मितेन हसितं वचनं बभाषे
संछेदयाशु मम मस्तकमुद्धतासे ॥ ८८ ॥

" किं कारणं सुकविराज दरस्मितस्य
भीतिर्न किं तव भविष्यति " " भीः कथं वा ।

उत्फुल्लपद्मविलसद्वदनारविन्दा
देवी मदीयहृदये निवसत्यजस्रम् ” ॥ ८९ ॥
शशं कुरङ्गं जलधेश्च पङ्कं कलङ्कमिन्दोः कवयो वदन्ति ।
वयं त्वमी जारवधूकठोरनिरीक्षणोद्घट्टननीलिमानम् ॥ ९० ॥
तरुणतमालकोमलमलीमसमेतदयं कलयति
चन्द्रमाः किल कलङ्क इति ब्रुवते ।
तदनृतमेव निर्दयविधुंतुददन्तपदव्रणविवरोपरि
रन्ध्रमिदं तु विदंतु नाम ॥ ९१ ॥
कस्तूरीतिलकं फाले बाले मा कुरु मा कुरु ।
अद्य साम्यं भजामीति ब्रूहते शशलाञ्छनः ॥ ९२ ॥
शान्ते मन्मथसङ्गरे रणजितां सत्कारमातन्वती
वासोऽदाज्जघनस्य पीनकुचयोर्हारं श्रुतेः कुण्डलम् ।
बिम्बोष्टस्य च वीटिकां वरतनोः पाण्यो रणत्कङ्कणे
पश्चाल्लम्बिनि केशपाशनिचये युक्तो हि बन्धक्रमः ॥ ९३ ॥
तिर्यक्पादतले प्रसार्य सरसा रज्जुं विकृष्यानता
कूपान्तर्निहितेक्षणा कुटिलदृक्कुम्भं निपूर्याञ्जसा ।
आलोलालकमन्तकुन्तलभरं पर्यायनृत्यत्कुचं
रज्ज्वाकर्षणमेव सा न कुरुते यूनां मनःकर्षणम् ॥ ९४ ॥
माषपेषणमिषेण मृगाक्षी किंचिदुच्चलितचारुनितम्बा ।
प्रोषिते प्रियतमे चिरकालाद्विस्मृतं सुरतमभ्यसतीव ॥ ९५ ॥
धम्मिल्लं दृढमाकलय्य तरलान्यूह्यालकानुल्लस-
द्दोर्मूलाद्विगलय्य भूषणमपि न्यस्तं तदात्वोचितम् ।
मद्वीक्षास्थगितस्तनं विचलितक्षामांबरं यच्च ते
सन्नाहः स्मरसङ्गराय पतति स्वान्तं सरोजाक्षि मे ॥ ९६ ॥
शनैः क्रीडायुद्धे शममुपगते शम्बररिपोः
प्रतिप्रस्थानाय प्रसभमुदितः काहल इव ।
कवाटक्केङ्कारः करवलयनिक्काणगुणितः
पुरंध्रीणामन्तर्मणिमयनिकेतादुदयते ॥ ९७ ॥
क्षीबन्ती मृगनाभिसौरभमिलद्वीठी रसच्चंचल-
त्ताटंका खदिरेण कुन्दरदना दन्तान्मुदा धावति ।
पश्यन्ती मुकुरेऽधरक्षततती: किंचित्प्रकम्पस्तनी
पश्चादंसविलम्बमानकबरीभारा रणत्कङ्कणा ॥ ९८ ॥
बाले तवाधरसुधारसपानकाले चेतो मदीयमिह वाञ्छति शेषभावम् ।
आलिङ्गने तव विरोचनपात्रभावमाखण्डलत्वमखिलाङ्गनिरीक्षणेषु ॥९९॥
नेन्दुः सुधान्ता शिबिका न चाङ्को नाल्तस्तदन्तर्मकराङ्क एषः ।
नेदं नभस्तूपवनं मनोज्ञं तारा न चाप्सानुचराः शुभाङ्गाः ॥ १०० ॥

परिशिष्ट ३

बिल्हणपञ्चाशत्प्रत्युत्तरम्

—अथवा—

नरेन्द्रतनयासंजल्पितम्.

हेरम्बं प्रणिपत्य शारदतया ध्यात्वा सुतां ब्रह्मणः
स्तुत्वा वाक्पतिमाधमेव च कविं नारायणं वन्द्य च।
पश्चाच्छ्रीगुरुचक्रपाणिचरणद्वन्द्वप्रसादादहं
वक्ष्ये बिल्हणविप्रयोगवशतो या राजपुत्र्योक्तयः ॥ १ ॥

श्रुत्वा नरेन्द्रतनया तु विभाविनीभिर्नीतं वधाय वधकैश्च कवीश्वरं तम्।
आगत्य तूर्णमहितैरिति वाक्यशल्यैः सा पूरितार्द्रहृदया भवने बभूव ॥ २ ॥
श्रुत्वा वचांसि तनया नरनायकस्य ताभ्यः प्रचण्डपरितापकराणि कर्णे।
मोहं जगाम सहसा निपपात भूमौ निश्चेतना द्रुतसमग्रजरेव वल्ली ॥ ३ ॥
दृष्ट्वा गतासुमिव गोप्यगृहप्रचारैराक्रन्दितं शशिकला निभृता स्थिता किम्।
ताभ्यः परेण विदितं च ततो नृपेण आगत्य तत्र तनयाविहितं चकार ॥ ४ ॥
दृष्ट्वा नृपोऽप्यकुशलां तनयां स्वगेहे दत्त्वा धनं बहुविधं तदुपासकेभ्यः।
यद्याचयिष्यति वरं कनकादिवस्तु तद्दीयतां मम वचो न तु याचनीयम् ॥ ५ ॥
मोहेन युक्ता विविधोपचारैर्नो भाषते नात्ति च नीरमन्नम्।
न स्नाति न क्रीडति सारिकाद्यैश्चित्ते स्मरन्ती सुकवेर्विलासान् ॥ ६ ॥

× × × ×

अद्यापि तेन न विनाम्ब भुनज्मि भक्ष्यं न क्रीडयामि शुकसारिकथोः सखीभिः।
कामानुरूपमनुरूपितविग्रहेण श्रीबिल्हणेन सखि जीवितुमुत्सहेऽत्तुम् ॥ १ ॥
अद्यापि तं सखि सुरङ्गमुखारविन्दं सस्मेरलोचनयुगं सुविनीतवाचम्।
भ्रूविभ्रमेण जितकामधनुर्विलासं श्रीबिल्हणं निजगुरुं मनसा स्मरामि ॥ २ ॥
अद्य द्विजं द्विजविनिर्जितकुंदपुष्पं पुष्पानुकारिमुखवासमपूर्वहासम्।
तं बिल्हणं नरमृते न परं पुमांसं चित्ते स्मरामि न वदामि न चाश्रयामि ॥ ३ ॥
अद्यापि तस्य वचनामृतसिन्धुपूरैः संपूरितं श्रुतियुगं मनसा विचिन्त्य।
श्रोष्येऽद्य कस्य वचनं मधुरं परेषामिन्द्रादिकामबुधसोमधनाधिपानाम् ॥ ४ ॥
अद्याधरं सखि निवेश्य मुखे तदीयं बिम्बानुकारि गुणतो न तु तुल्यवेषे।
संश्लिष्य मोहनविधौ विधिपूर्वकं च सुप्तं तदोरसि निजाङ्गमनुस्मरामि ॥ ५ ॥
अद्यापि तेन शयने सखि संनिवेश्य वामं करं च मिथतो मम कन्धराया।
आरोप्य गाढमधरं परिचुम्ब्य भावात्पुष्पादिचन्दनयुतं शयितं स्मरामि ॥ ६ ॥

अद्यापि तेन विपरीतरते प्रयुक्ता जानामि नो रमण एष विधिः प्रकामम् ।
अत्यादराद्विवदती विधिवत्प्रयुक्तं नो कुर्वती च रुषितं मनसि स्मरामि ॥ ७ ॥
अद्यापि तेन रहसि प्रतिबोधिताहं किं मामवेक्ष्य वदनं पिहितं करोषि ।
भीरोऽधुना किमु विवासय गुप्तमङ्गं द्रक्ष्ये रवाविति वचो मनसा स्मरामि ॥ ८ ॥
अद्यापि तेन कितवेन गृहीतवस्त्रा शय्यानिवेशभवनं सखि नीयमाना ।
प्रेमार्द्ररुद्धवचनानि मुहुः सृजन्ती चात्मानमप्रतिमलब्धरसं स्मरामि ॥ ९ ॥
अद्यापि मामवदतीं समवेक्ष्य कस्मात्प्रेमादरेण बहुचाटुपरंपरेण ।
आलम्ब्य पादयुगलं शिरसावलुण्ठ्य चास्माकमाद्यगमितप्रकृतिं स्मरामि ॥ १० ॥
अद्यापि तं सखि समाजगतं प्रपन्नं कामातुरं कनकभूषणभूषिताङ्गम् ।
कर्पूरपूररसचन्दनचर्चिताङ्गं व्रीडावशेन धृतमौनविधिं स्मरामि ॥ ११ ॥
अद्यापि तं मयि कृतागसि लोभनीयैर्वाक्यैर्विशेषसुरतक्रमसंप्रयुक्तैः ।
संतोष्यमाणमपि रोषभरेण वाक्यं किंचिन्मया प्रमदनं मनसा स्मरामि ॥ १२ ॥
अद्याप्यमूनि वचनानि मुहुर्वितन्वन्संभोगकेलिसमये विनिवार्यमाणः ।
'हा' हेति 'जीवि तव दास' 'प्रिये'ऽथ 'शीघ्रमालिंगनं कुरु' बहूनि हृदि स्मरामि॥१३॥
अद्य प्रदोषसमये मधुमाधवतौ स्नात्वाविलिप्य मसृणैश्च सुधूपिताङ्गः ।
नीत्वा सुगन्धकमुकं शुचिवस्त्रधारी मामाजगाम हसतस्तमहं स्मरामि ॥ १४ ॥
अद्यापि तं करवरेण गृहीतबाहुर्मामादरेण सुहृदासममालिलिङ्ग ।
आनम्य वक्त्रकमलं द्विजवाससी मे पेपीयमानमधुमत्तमहं स्मरामि ॥ १५ ॥
अद्यापि तेन जघने मदवैपरीत्याद्रेखा कृता बहुखरा करजैः सुतीव्रैः ।
तद्दर्शनाच्च दयितस्य मदोऽपि शान्तः सव्रीडितां सखिसमक्षमहं स्मरामि ॥१६॥
अद्यापि तस्य चरणं परिधौतमेकं कृत्वा परं विदधती स्वकरे स्मरार्ता ।
कम्पा प्रियेण विदिता बहुधा च भुक्ता तत्कामुकत्वमतुलं मनसा स्मरामि ॥ १७ ॥
अद्यापि तत्कनकवर्णमुखाब्जभासं फुल्लेन्दुकुन्दशशलाञ्छनवत्सहासम् ।
तस्य स्मरामि रतिकर्मविधौ प्रियस्य गात्रं विचित्ररसविश्रमणैकपात्रम् ॥ १८ ॥
अद्यापि तस्य सरलाङ्गुलिपाणियुग्मं कर्पूरपूरमृगनाभिसुचन्दनाढ्यम् ।
दत्त्वा मम स्तनयुगोपरि पूर्वमुच्चैस्तन्मर्दनादि परुषं मनसा स्मरामि ॥ १९ ॥
अद्यापि तं भुजयुगार्पितकण्ठबन्धं वक्षःस्थलं मम पिधाय करद्वयेन ।
ईषद्विलज्जितसलीलविलोचनान्तं पश्यामि तद्वदनमुन्मदनं पिबन्तम् ॥ २० ॥
अद्यापि तत्सपरितोषशशिप्रकाशमास्यं स्मरामि जलकेलिविवर्तनेषु ।
उद्वारमुद्धृतकराञ्जलिधौतमानमाभग्नपुण्ड्रनिचयं मनसा स्मरामि ॥ २१ ॥
अद्यापि तं सुनिभृतक्रममापतन्तीं मां द्वारि वीक्ष्य कितवात्सहसैव सुप्तम् ।
स्पृष्ट्वा मया सपुलकं समबुध्यमानं व्युत्फुल्लिताङ्गसकलं बहुशः स्मरामि ॥ २२ ॥

श्रीबिल्हणकविकृता चौरपञ्चाशिका

अद्यापि तं स्मितमुखं सुरतान्तरेषु मत्पाणिनिर्दयगृहीतकुचं स्मरामि ।
मूर्द्धीतरश्रमजलाकुलपूरिताङ्गं श्वासोत्तरं स्मररसेन मुहुर्भणन्तम् ॥ २३ ॥
अद्यापि तद्गुरुभयेन लघूत्तरां मामापृच्छ्य चैव बहुमानभयेन यान्तम् ।
उत्थाय पूरितदृशं बहु निःश्वसन्तं कामातुरं किमपि नम्रमुखं स्मरामि ॥ २४ ॥
अद्यापि मे जघनदर्शनलालसेन क्रान्तं च तेन वसनाञ्चलमेकसुप्त्या ।
पूर्वोत्थितेन निगृहीतमथो करेण नूनं मयेति विदितं न वचः स्मरामि ॥ २५ ॥
अद्यापि मां प्रथममेव गतां विरामं निर्भर्त्स्यं हास्यवचनैर्बहुभिर्मुहुश्च ।
आलिङ्ग्य गाढमधरं परिचुम्ब्य मन्दं गुह्ये मम स्वनिहितैककरं स्मरामि ॥ २६ ॥
अद्यापि तं विलुलितश्लथकेशभावाद्वासोविवर्तनवशाद्बहुघृष्टपृष्ठम् ।
शय्योत्थितं च विधुरं मुहुरङ्गभङ्गं पश्यामि घृष्टमधुरं च बहु स्पृशन्तम् ॥ २७ ॥
अद्यापि तं रहसि तत्क्षणसंप्रबुद्धं निद्रालसं नयनमर्दनघृष्टबाहुम् ।
जृम्भाविदीर्णवदनं च मया स्वदत्तं पेपीयमानसुजलं मनसा स्मरामि ॥ २८ ॥
अद्यापि मां प्रथमसङ्गमजातलज्जां दृष्ट्वा निवेश्य शयने सुरतोपहारे ।
मन्दं यथा मम मुखकमुकादिदानात्प्राप्तागसं सुमनसं हृदये करोमि ॥ २९ ॥
अद्यापि तं गतिपराजितपञ्चवक्त्रं धम्मिल्लभारजितमत्तमयूरपिच्छम् ।
चक्षुःश्रिया हसितकोकनदप्रवादं संचिन्तयामि जितशब्दगजेन्द्रकण्ठम् ॥ ३० ॥
अद्यापि मे मदनमार्गणविह्वलायाश्चान्तर्मुखे द्विजपद मुदसं निधाय ।
अङ्गैरनङ्गविवशैर्मम गाढमङ्गमामर्द्य केलिशयने शयित स्मरामि ॥ ३१ ॥
अद्यापि मामुपवने स्वसखीसमेतां श्रुत्वा गतां जलविहाररसाद्वसन्ते ।
आगत्य पार्श्वमपि लोकभयान्मदङ्गसंदर्शनाय मृदुदत्तदृशं स्मरामि ॥ ३२ ॥
अद्यापि तं स्मरभरेण समुल्लसन्तं नश्यद्वलित्रयमुदञ्चितरोमराजिम् ।
पश्यामि वेल्लितभुजं विहिताङ्गभङ्ग्याजेन नाभिकुकुदं मयि दर्शयन्तम् ॥ ३३ ॥
अद्यापि तानि सखि मिश्रितभाषणानि भ्रूविभ्रमेण नयनान्तविलोकितानि ।
लीलाविचित्रगमनानि शुचिस्मितानि तस्य स्मरामि हृदि मन्मथचेष्टितानि ॥३४॥
अद्यापि तं द्विजवरं मृगराजतुल्यं लोलद्वराङ्गदकरं शुभचन्दनाढ्यम् ।
सन्नागवल्लिदलपूरितवक्त्रपद्मं कापायवस्त्रपरिशोभिकटिं स्मरामि ॥ ३५ ॥
अद्यापि तस्य वचनानि हृदि स्फुरन्ति संभोगयाचनविधौ गदितान्यभीक्ष्णम् ।
कान्ते विलोलनयने शुभपूर्णबिम्बचन्द्रानने सफलयेति ममाभिलाषम् ॥ ३६ ॥
अद्य स्मरामि सखि नीविविमोचनायानेन प्रकोष्ठनिहितो मम नाभिदेशे ।
ज्ञात्वा धृतोऽथ रभसेन मयाप्यनेन व्याकृष्य तत्र निहितो विषयो न वाण्या ॥३७॥
अद्य स्मरामि तदनु द्विजबिल्हणेन संश्लिष्य गाढमुरसा शयने निवेश्य ।
पीत्वाधरं तदनु तद्धृदयस्थितं स्वमात्मानमस्य रुचिरं गुरुतां श्रयन्तम् ॥ ३८ ॥

अद्यानवद्यवचनेन कृतापराधां मां तोषयन्तमतिदीनमुखं स्मरामि ।
दृष्ट्वाधरे रदकृतं पदमङ्गचार्यं संलोहितान्तनयनं वचनेन मौनम् ॥ ३९ ॥
अद्याम्रपल्लवकराङ्गुलिभिर्ममौष्ठमामर्द्य निर्दयतरं दिवसस्य भागे ।
सक्रोधिताननमवेक्ष्य सखीमुखेन पश्चात्प्रमत्तकरणं समयं स्मराभि ॥ ४० ॥
श्रीमन्मृगेन्द्रतनुमध्यकृतं वरास्यं सर्वाङ्गदत्तसकलाभरणं सलीलम् ।
विस्तीर्णवक्त्रकमलं सरलाङ्घ्रिबाहुं श्रीबिल्हणं द्विजवरं सततं स्मरामि ॥ ४१ ॥
अद्यापि तेन कविना स्वजने प्रयुक्तां मां मोहनेन रमयेति विशालनेत्राम् ।
श्रुत्वा तदेव वचनं सुविचार्यं चित्ते कामातुरस्य न भयं समयं स्मरामि ॥ ४२ ॥

× × × ×

एवंविधानि वचनानि समुत्सृजन्ती पृष्टा जनेन गुरुणा किमिदं ब्रवीषि ।
सत्यं वदामि न परं नरमुत्सहेऽहं श्रीबिल्हणाद् द्विजवरादिह जन्मतोऽपि ॥ १ ॥
तेनोक्तमेव नरनायकनायकेन वार्ताविशेषविहितं कविविप्रगीतम् ।
जानीहि चास्य वधकारणमत्र पुत्रि राज्ञस्तदेव विदितं जनतावचोभिः ॥ २ ॥
तेनोक्तमेव कृतिवाक्यविदा निशम्य मोहं जगाम सहसैव निमील्य नेत्रे ।
मोहादनुप्रवदतीमहमग्निवेशं संसाधयामि वचनं विदितं नृपेण ॥ ३ ॥
निवार्यमाणा विविधप्रकारैर्न किंचिदन्यद्वचनं बभाषे ।
वसुप्रवेशादथ शस्त्रघाताद्विषाशनान्मे मरणं ध्रुवं स्यात् ॥ ४ ॥
नृपेण तस्या वचनं सुनिश्चितं विचार्य चित्ते बहुभिर्विमृश्य ।
अभूदिदं यद्भवितव्यमन्यथा भवेत्कथं विप्रवधोऽतिदुःसहः ॥ ५ ॥
अथ नरपतिवर्यो विप्रवर्यं विमुक्त्वा वधकरणसुनीडाद्राजगेहे निवेश्य ।
बहुधनवसनाद्यैर्भूषितां भूषणार्हां सममनुचरवर्गैः प्राददत्तां द्विजाय ॥ ६ ॥
काश्मीरकस्तदनु तां नरराजपुत्रीं नीत्वा स्ववेश्म गजपत्तिरथाश्वयुक्तम् ।
मृत्युं गतोऽपि परिपूर्णमहाभिलाषस्तुष्टे विधौ न भवतीह किमत्र पुंसाम् ॥ ७ ॥

× × × ×

प्राग्वाटान्वयभूषणं बहुगुणः श्रीपद्मसिंहोऽभव-
त्तत्पुत्रः किल भूतलेऽस्ति चतुरः श्रीवीरमन्त्रीश्वरः ।
तस्यैतत्स्पृहया चकार रसिकं सत्कामिनीभूवरः
श्रीबब्बूहुपुरे नरेन्द्रतनयासंजल्पितं नामतः ॥ १ ॥

॥ इति श्रीभूवरकवीश्वरकृतं श्रीबिल्हणपञ्चाशत्प्रत्युत्तरं नरेन्द्रतनयासंजल्पितं नाम काव्यं समाप्तिमगमत् ॥

भूखस्मृतीन्दु (१६०१) संयुक्ते सिद्धार्थीवत्सरे शुचौ ।
भूपजाजल्पितं काव्यमलिखद्भैरवः शुभम् ॥

परिशिष्ट ४

पाठान्तरेषु दृष्टानि अधिकानि पद्यानि

——१२७/७६ मिते पुस्तके [काश्मीरीयपाठे]

ॐ स्वस्ति श्रीप्रमथपतयेनमः । श्री श्रीपतये नमः ।

सर्वस्वं गृहवर्ति कुन्तलपतिर्गृह्णातु तन्मे पुन--

भांण्डागारमखण्डमेव हृदये जागर्ति सारस्वतम् ।
रे क्षुद्रास्त्यजत प्रमोदमचिरादेष्यन्ति मन्मन्दिरं
हेलान्दोलितकर्णतालकरटीस्कन्धाधिरूढाः श्रियः ॥ १

अथि किमनिशं राजद्वारे समुद्धरकन्धरे
कुवलयदलस्निग्धे मुग्धे विमुञ्चसि लोचने ।
अमररमणीलीलावल्गद्विलोचनवागुरा —
विषयपतितो न व्यावृत्तिं करिष्यति बिल्हणः ॥ २

अद्यापि तां सुरतलब्धयशःपताकां लम्बालकां विरहपाण्डुरगण्डभित्तिम् ।
सुप्तां विलोलनयनां क्षणदृष्टनष्टां विद्यां प्रमादगुणितामिव संस्मरामि ॥ ३

अद्यापि तद्विकसिताम्बुजमध्यगौरं गोरोचनातिलकमण्डितमध्यदेशम् ।
ईषन्निमीलितविधूर्णितदृष्टिपातं कान्तामुखं पथि मया सह गच्छतीव ॥ ४

अद्यापि तां कुटिलकोमलकालकेशीमुन्निद्रताम्रसपत्रविशालनेत्राम् ।
उत्तुङ्गपीवरकठोरपयोधराढ्यां ध्यायामि चेतसि महोन्नतसन्नितम्बाम् ॥ ५

अद्यापि तद्विकचकुन्दसमानदन्तं तिर्यग्विवर्तितविलोलविलोचनान्तम् ।
तस्या मुखं न हि मनागपि विस्मरामि चित्ते कृतज्ञ इव हन्त परोपकारम् ॥६

अद्यापि तत्सरलमञ्जुलतुङ्गनासं किंचिल्स्मितोल्लसितपाण्डुरगण्डदेशम् ।
पश्यामि पूर्णशरदिन्दुसमानकान्ति कान्तामुखं विकचपङ्कजपत्रनेत्रम् ॥ ७

अद्यापि तन्मदनकार्मुकभङ्गरभ्रु दन्तद्युतिप्रकरकर्बुरिताधरोष्ठम् ।
कर्णान्तसक्तविपुलोज्ज्वलकज्जलनेत्रं तस्याः पुनः पुनरपीह मुखं स्मरामि ॥ ८

अद्यापि तां रतविवर्तितकन्धराग्रां न्यस्तैकपाणिकमलां च नितम्बबिम्बे ।
वामाङ्गपार्श्वचलदुज्ज्वलकेशपाशां पश्यामि तां प्रति दृशं बहुशः क्षिपन्तीम् ॥९

अद्यापि मामवगणय्य कृतापराधमापादमूलपतितं सहसा चलन्तीम् ।
वक्त्राच्चलं मम करान्निजमाक्षिपन्तीं मामेति रोषपरुषं रुदतीं स्मरामि ॥ १०

श्रीबिल्हणकविकृता चौरपञ्चाशिका

अद्यापि स्खलिततारकमीक्षिताक्षमास्यं स्मरामि सुतरां सुरतात्तपाने ।
तत्कालनिःसितनिहुतचन्द्रकान्ति स्वेदोदबिन्दुपरिदन्तुरितं प्रियायाः ॥११

मयि कृतागसि धृष्टभावात्संभाषयत्यपि मुहुर्निगृहीतवाचम् ।
रुमन्युजबाष्पकण्ठं निःश्वासशुष्यदधरं रुदतीं स्मरामि ॥ १२

युक्तमनीयनितम्बवस्त्रां पश्यामि साध्वसरसाकुलविह्वलाङ्गीम् ।
[illegible]हतेन करेण पाणिमन्येन नाभिकुहरादवर्तां मदीयम् ॥ १३

अद्यापि तां सुरभिदुर्धरगन्धलोभाद्वाधन्तमास्यकमलं प्रति चञ्चरीकम् ।
किंचिल्लसच्चलितकुञ्चितचारुनेत्रां पश्यामि केलिकमलेन निवारयन्तीम् ॥१४

अद्यापि तांमिह ततश्च पुरश्च पश्चादन्तर्बहिः पुरत एव परिभ्रमन्तीम् ।
पश्यामि फुल्लकनकाम्बुजसंनिभेन वक्त्रेण तिर्यगनिवर्तितलोचनेन ॥ १५

अद्यापि तामतिविशालनितम्बबिम्बां गम्भीरनाभिकुहरां तनुमध्यभागाम् ।
अम्लानकोमलमृणालसमानबाहुं लोलालसाञ्चितगतिं मनसा स्मरामि ॥ १६

अद्यापि तानि मम चेतसि विस्फुरन्ति कर्णान्तसंगतिकटाक्षनिरीक्षितानि ।
तस्याः स्मरज्वरकराणि मदालसानि लीलाविलासचटुलानि विलोचनानि॥१७

अद्यापि तत्तरलतारतराक्षमास्यमालिप्तचन्दनरसाहितपाण्डुकान्ति ।
कस्तूरिकाकुलितपत्रलताभिरामं गल्लस्थलं हृदि मुहुः स्थिरयामि तस्याः ॥ १८

अद्यापि तत्कुचयुगग्रहणेन गाढ दन्तैर्मया दशनवाससि खण्डयमाने ।
तस्या मनागलसलोचनमीक्षमाणं सीत्कारगर्भमसकृद्रुदनं स्मरामि ॥ १९

अद्यापि तानि हृदये मम विस्फुरन्ति बिम्बोष्ठपृष्ठकरकीर्णसुनिष्कृतानि ।
पीयूषपूरमधुराणि बहूतराणि वाक्यानि मन्मथकराणि च [illegible]यायाः ॥ २०

अद्यापि तां कनकपत्रसनाथकर्णामुत्तुङ्गकर्कशकुचार्पितहारतारम् ।
काञ्चीनियन्त्रितविशालनितम्बबिम्बामुद्दामनूपुररणच्चरणां स्मरामि ॥ २१

अद्यापि तां भुजलतार्पितकण्ठपाशां वक्षःस्थलं मम विधाय पयोधराभ्याम् ।
ईषन्निमीलितसुलोलविलोचनान्तां पश्यामि मद्वदनमुन्मदनं पिबन्तीम् ॥ २२

अद्यापि तानि परिवर्तितकन्धराणि चञ्चत्कुचप्रथितकञ्चुकबन्धनानि ।
तस्याः सुपल्लवमृदूज्ज्वलकुन्तलानि चित्ते स्फुरन्ति मम चित्रविलोकितानि॥२३

अद्यापि तत्सपरिवेशशशिप्रकाशमास्यं स्मरामि जडगात्रविवर्तनेन ।
उद्वेलपल्लवकराङ्गुलिजालगुम्फदोःकन्दलीयुगुलमंडलितं प्रियायाः ॥ २४

अद्यापि तामनुनयत्यपि मय्यसक्तं व्यावृत्य केलिशयने शयितां वराङ्गीम् ।
निद्राकुलामिव कलासु सुखीभवन्तीं प्रातर्मदंसनिहितं ककुदं स्मरामि ॥ २५

अद्यापि तां स्मितमुखीं पुरुषायितेषु लम्बालकाकुलकपोलतलां स्मरामि ।
आन्दोलनश्रमजलाकुलविह्वलाङ्गीं श्वासानिलातिसुरभीकृतकेलिगेहाम् ॥ २६

अद्यापि तां रहसि दर्पणमीक्षमाणां संक्रान्तमप्रतिमं मयि दृष्टलाभे ।
पश्यामि वेपथुमतीं च ससंभ्रमां च लज्जाकुलां समदनां च सविभ्रमां च ॥२७
अद्यापि तां मयि समीपकवाटलीने सन्मार्गमुक्तदशमाननदत्तहस्ताम् ।
मद्रोत्रलिङ्गितपदं मृदुकाकलीभिः किंचिच्च गातुमनसं मनसा स्मरामि ॥ २८
अद्यापि तां मुखगतैररुणैः कराग्रैरापृच्छ्यमानमपि मां न विभाषयन्तीम् ।
तद्बाष्पपूरितदृशं बहु निःश्वसन्तीं चिन्ताकुलां किमपि नम्रमुखीं स्मरामि ॥२९
अद्यापि मे वरातनोर्मधुराणि तस्या यान्यर्थवन्ति न च यानि निरर्थकानि ।
निद्रानिमीलितदृशो मदमन्थरायास्तान्यक्षराणि हृदये किमपि ध्वनन्ति ॥३०
अद्यापि तत्सुरतकेलिविमर्दखेदसंजातघर्मकणविस्फुरितं प्रियायाः ।
आपाण्डुरं तरलतारनिमीलिताक्षं वक्त्रं स्मरामि परिपूर्णनिशाकराभम् ॥ ३१
अद्यापि तां मम मनःपरितापशान्त्यै चक्षुर्विशुद्धतटिनीमलसालसाङ्गीम् ।
श्रीखण्डखण्डखचिताचितगात्रयष्टिं तन्वीं सदा हृदयहर्षनिधिं स्मरामि ॥ ३२
अद्यापि तां निभृतवक्त्रकमापतन्तं मां द्वारि वीक्ष्य सहसैव मिषेण सुप्ताम् ।
सन्दं मयि स्पृशति कण्टकिताङ्गयष्टिमुत्फुल्लगल्लफलकां बहुशः स्मरामि ॥ ३३
अद्यापि तां चिरगते मयि पादचारैर्यातां समं स्वभवने परिवर्तमानाम् ।
पर्यस्थितां किमपि संचलितां निषण्णां निःश्वासमाश्रितवतीमधिकं स्मरामि ॥३४

— इटट४टट मिते पुस्तके —(यत्र काश्मीरीयमागरीपाठौ संगृहीतौ । तथा कानिचिदधिकान्यपि पद्यानि लभ्यन्ते । तानि यथा—)

अद्यापि तामलसमीलितसाचिनेत्रां लोलद्भुजावलयझंकृतिशब्दहस्ताम् ।
चञ्चत्कठोरकुचमुन्नमितभ्रु कर्णे कण्डूयनं विदधतीं हृदि चिन्तयामि ॥ १
अद्यापि तामुरसिजद्वयमुन्नमय्य भ्रश्यद्वलित्रितयलक्षितरोमराजि ।
ध्यायामि चालितभुजां विहिताङ्गभङ्गव्याजेन नाभिकुहरं मम दर्शयन्तीम् ॥ २
अद्यापि तानि मृदुसारसुभाषितानि तिर्यग्विवृत्य नयनान्तनिरीक्षणानि ।
लीलालसाञ्चितगतानि शुचिस्मितानि तस्याः स्मरामि हृदि विभ्रमचेतनानि ॥ ३
अद्यापि तज्जघनदर्शनलालसाङ्गीं कृष्टं मयातिवसनाञ्चलमेकपार्श्वात् ।
पूर्वोत्थितां मम रते बहुशः क्षिपन्तीं मन्दाक्षसंकुचितसर्वतनुं स्मरामि ॥ ४
अद्यापि तां प्रथममेव गतां विरामं निर्भर्त्स्य रोषवचनैः परुषैर्मुहुर्माम् ।
आन्दोलितोद्धतनितम्बसहायवृत्या संचिन्तयामि रतये रुदतीमभीक्ष्णम् ॥ ५
अद्यापि तां विलुलितांशुककेशपाशां किंचित्समुन्मुषितघूर्णिततिजह्मनेत्राम् ।
सुप्तोत्थितां विदधतीं मुहुरङ्गभङ्गं पश्यामि चारुमधुरं बहुशः स्पृशन्तीम् ॥ ६

अद्यापि हा कथितहा[illegible]स्तालसंपाणिमाकुञ्चितैकचरणाग्रनिरुद्धभूमिम् ।
[illegible] पथि मां व्रजन्तं पश्यामि बन्धुरितकन्धरमीक्षमाणाम् ॥ ७
[illegible]लभीनिषण्णां संदेहसंश्रितमुखे मयि दृष्टिमार्गे ।
[illegible]कृतस्मितासु श्रुत्वा विलक्ष्य हसितां हृदि चिन्तयामि ॥ ८
अद्यापि तामनुनयत्यपि चाटुपूर्वं कोपात्पराकृतमुखीं मयि सापराधे ।
संगते प्रसभमुत्पुलकाङ्गयष्टिं मामेति निःस्पृहवचो ब्रुवतीं स्मरामि ॥ ९
अद्यापि तां गतिनिराकृतराजहंसीं धम्मिल्लनिर्जितमयूरकलापभाराम् ।
मुग्धां प्रियां हसितमत्तचकोरनेत्रां संचिन्तयामि कलकण्ठसमानकण्ठीम् ॥ १०
अद्यापि तां मदनमन्दिरवैजयन्तीमन्तर्मुखे मदधरोष्ठदलं विधाय ।
अङ्गैरनङ्गविकलैर्मम गाढमङ्गमालिङ्ग्य केलिशयने शयितां स्मरामि ॥ ११
अद्यापि तां समुपगम्य मया सखीभिः कोऽयं वदेत्यभिहितां बहुशो मृगाक्षीम् ।
मौनं न वेद्मि इति सस्मितमुल्लपन्तीमुत्पन्नकम्पपुलकाकुलितां स्मरामि ॥ १२
अद्यापि तां प्रथमसंगमजातलज्जां नीविं स्पृशत्यपि करे मम मन्दमन्दम् ।
फूत्कारकम्पितशिखातरलं प्रदीपं कर्णोत्पलेन विजिघांसुमहं स्मरामि ॥ १३
अद्यापि तामुषसि तत्क्षणविप्रबुद्धां निद्रालसां हृदि वहामि कृताङ्गभङ्गाम् ।
जृम्भाविदीर्घमुखमारुतगन्धलुब्धमुग्धभ्रमद्भ्रमरविभ्रमलोलनेत्राम् ॥ १४
अद्यापि तिष्ठति दृशोरिदमुत्तरीयं धर्तुं पुनः स्तनतटात्पतितं प्रवृत्ता ।
वाचं निशम्य नियतं नियतं ममेति किंचित्तदा यदकरोत्स्मितमायताक्षी ॥ १५

—अन्तेऽप्यधिकम्—

× × × × ×

भवत्कृते खञ्जनमञ्जुलाक्षि शिरो मदीयं यदि याति यातु ।
दशाननेनापि दशाननानि नीतानि नाशं जनकात्मजार्थम् ॥ १
प्रासादे सा पथि पथि च सा पृष्ठतः सा पुरः सा
पर्यङ्के सा दिशि दिशि च सा तद्वियोगातुरस्य ।
देहान्तः सा बहिरपि च सा नास्ति दृश्यं द्वितीयं
सा सा सा सा त्रिभुवनगता तन्मयं विश्वमेतत् ॥ २
संगमविरहवितर्के वरमिह विरहो न संगमस्तस्याः ।
संगे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥ ३
मम यदि सुकृतं स्यात्पूर्वजन्मार्जितं वै यदि सकलसुराणामर्चनं वास्ति किंचित् ।
यजनहवनवेदाध्यापनं चेन्मम स्यात्तदिह शशिकला मे प्राणनाथास्तु जाया ॥ ४

॥ इतिश्रीबिल्हणकविरचिता चौरपञ्चाशिका समाप्ता ॥

— दाक्षिणात्य पाठे ५० श्लोकानन्तरं इष्टानि पद्यानि —

पञ्चत्वं तनुरेतु भूतनिवहः स्वांशैर्विलन्तु ध्रुवं
धातस्त्वां प्रणिपत्य नम्रशिरसा याचे निबद्धाञ्जलिः ।
तद्वा दीर्घवयस्तदर्थमुकुरज्योतिस्तदीयालये
व्योम्नि व्योमि तदीयवर्त्मनि धरा तत्तालवृन्तानिलः ॥ १

चरणनवसरोजे चञ्चरीकः प्रियाया
जघनपुलिनदेशे जायते राजहंसः ।
स्तनशिखरिणि केकी वक्त्रचन्द्रे चकोर-
श्चिकुरभरपयोधौ चातको मानसं मे ॥ २

नारायणं त्रिनयनं नलिनासनं च नाथं यथेष्टमभिगच्छतु जीवलोकः ।
गात्रं जगन्त्रितयमोहनमङ्गनायाः कूलंकषस्तनभरं कुलदैवतं नः ॥ ३

॥ इति लीलाचोरपञ्चाशति युवतीमोहनभोजराजसंवादे शृंगारकाव्यः समाप्तः ॥

अथ चोरकवेर्विपद्यहीनमिह निव्यथते सुताम् ।
[illegible] ॥ १

तवाङ्गजा तद्विरहाग्निमक्षमा विसोढुमाराज्ज्वलदग्निमण्डले ।
प्रवेष्टुमास्ते सहते न संगतिर्ममास्तु भूमौ दिवि वेति निश्चिता ॥ २

इति निशम्य च भूपतिरेतयोर्हृदयमीक्ष्य परस्परसंगतम् ।
शमितकोपमतिः कविशेखरं पुनरपि स्वयमानयदालयम् ॥ ३

ततस्तस्मै राज्ञो महितमुरजोरुसुभगां
विभज्य प्रोत्तुङ्गद्विपरथहयसंकीर्णविभवाम् ।
महीं च प्रायच्छत्समुदवहदमेयप्रतिनिधिं
स चैनां कंदर्पोऽपर इव लावण्यसुभगः ॥ ४

राजमौलिमणिना नलिना सा कीर्तिमण्डलपयोनिधिना च ।
दत्तया वसुधया सुतया च श्रीपतिः सुखमवाप कवीन्द्रः ॥ ५

इतीव संभावनताद्रिमौलिः किमुज्जृम्भते मकरन्दबाष्पैः ।
धरित्रिपुष्पाञ्जलिरेष तुभ्यं सुता मदीया तव पालनीया ॥ ६

भट्टिर्नष्टो भारवीयोऽपि नष्टो भिक्षुर्नष्टो भीमसेनोऽपि नष्टः ।
भुक्तण्डोऽहं भूपतिस्त्वं हि राजन् भ भापङ्क्तावन्तकः संनिविष्टः ॥

----- ॥ इत्युत्तरपञ्चाशः समाप्तः ॥ -----